३ । १ । १६ ॥ वनीपकः ६ भिक्षुकः ७ भिक्षाकरः ८ । इति शब्दरत्नावली ॥ तस्य लघुत्वं यथा,—

"तृणादपि लघुस्तूलस्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ किञ्चित्प्रार्थनशङ्कया ॥"

इति प्राचीनाः ॥

अपि च ।

"कुजस्य कीटघातस्य वाताग्निष्ठ्यापितस्य च ।
शिखरे वसतस्तस्य वरं जन्म न याचितम् ॥
जगत्पतिर्हि याचित्वा विष्णुर्वामनतां गतः ।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघवम् ॥"

इति गारुडे नीतिसारे ११५ अध्यायः ॥

याचत्, [त्] त्रि, (याचतीति । याच् + शतृ ।) याचकः । यथा,—

"सुखभङ्गः स्वरो दीनो गात्रखेदो महद्भयम् ।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः ॥"

इति गारुडे नीतिसारे ११५ अध्यायः ॥

याचनं, क्ली, ( याच् + भावे ल्युट् । ) याच्ञा । ( यथा, नैषधे । ५ । ११२ ।

"भीमजार्थयाचनवाचे
यूयमेव गुरवः करणीयाः ॥")

याचनकः, त्रि, (याचन + स्वार्थे कन् ।) याचकः । इत्यमरः । ३।१।४६ ॥ ( यथा, मनौ । ३।१६५ ।
"आचारहीनः क्लीवश्च नित्यं याचनकस्तथा ॥")

याचना, स्त्री, ( याच् + स्वार्थे णिच् + युच् । टाप् । ) याच्ञा । इत्यमरः । २ । ७ । ३२ ॥ ( यथा, रामायणे । २ । २७ । २३ ।
"नयस्व मां साधु कुरुष्व याचनाम् ॥")

याचमानः, त्रि, (याचते इति । याच् + शानच् ।) याचकः । यथा,—

"नवीनदीनभावस्य याचमानस्य मानिनः ।
वचोजीवितयोरासीत् पुरोनिःसरणे रणः ॥"

इति वररुचिः ॥

अपि च ।

"द्विजेभ्यो याचमानेभ्यो यजमानः प्रयच्छति ।
स याति चाक्षयान् लोकान् येभ्यो नावर्त्तते पुनः ॥
षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि ।
योऽशुभस्यापि भवति निरये प्रतिषेधकः ॥"

इति वह्निपुराणे वामनप्रादुर्भावो नामाध्यायः ॥

याचितं, क्ली, ( याच् + क्तः । ) याचनवृत्तिः । तत्पर्य्यायः । मृतम् २ । यथा,—

"द्वे याचितायाचितयोर्यथासंख्यं मृतामृते ॥"

इत्यमरः । २ । ९ । ३२ ॥

"द्वे । याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतम् । अयाचितं अमृतमिव अमृतम् । याचितायाचितयोर्भावे कर्म्मणि वा क्तः ।" इति भरतः ॥ प्रार्थितवस्तुनि, त्रि ॥ ( यथा, देवीभागवते । ३ । २८ । ६७ ।

"पिता ते याचितः पूर्व्वं मया वै सतृसतेऽनघे ! ॥")

याचितकं, क्ली, (याचितेन निर्वृत्तम् । याचित + "अपमित्ययाचिताभ्यां कक्कनौ ।" ४ । ४ । २१ । इति कन् ।) याच्ञाप्राप्तम् । इत्यमरः । २।९।४॥

"याच्ञया । प्रत्यर्पणीयत्वेन याच्ञया यत् प्राप्तमलङ्कारादिवस्तु तत् याचितकम् । कार्य्यानन्तरं वस्तुस्वामी यत् पुनर्गृह्णाति तदित्यर्थः । याचितेन प्राप्तमिति ठञे काद्दिति कः ।" इति भरतः ॥

याच्ञा, स्त्री, (याचनमिति । याच् + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति नङ् । ) याचनम् । तत्पर्य्यायः । अभिशस्तिः २ याचना ३ अर्थना ४ भिक्षा ५ अर्द्दना ६ । इत्यमरः । २ । ७ । ३२ ॥ लालसा ७ । इति जटाधरः ॥ (यथा, भागवते । २ । ७ । १७ ।

"ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः ।
क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृते पथि चरन् प्रभुभिर्न चाल्यः ॥")

तद्वैदिकपर्य्यायः । ईमहे १ यामि २ मन्महे ३ दद्धि ४ शग्धि ५ पूर्द्धि ६ मिमिड्ढि ७ मिमीढि ८ रिरिड्ढि ९ रिरीहि १० पीपरत् ११ यन्तारः १२ यन्धि १३ इषुध्यति १४ मदेमहि १५ मनामहे १६ मायते १७ । इति सप्तदश याच्ञाकर्म्माणः । इति वेदनिघण्टौ ३ अः ॥

याजः, पुं, अन्नम् । इति हेमचन्द्रः । ३ । ५९ ॥ ( ऋषिभेदः । यथा, महाभारते ।१।१६८।७।

"याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ ॥")

याजकः, पुं, (यजतीति । यज् + ण्वुल् ।) याज्ञिकः । राज्ञो गजः । इति मेदिनी । के, १४२ ॥ मत्तहस्ती । इति जटाधरः ॥ ऋत्विक् । यथा,

"अग्नीध्राद्या धनैर्व्वार्य्या ऋत्विजो याजकाश्च ते ॥"

इत्यमरः । २ । ७ । १७ ॥

"यजमानेन धनैर्व्वार्य्याः सवानि दत्त्वा इदमस्मात्कार्यं दनाय व्रियन्ते प्रार्थ्यन्ते ये अग्नीध्रप्रभृतयस्ते ऋत्विजो याजकाश्च कथ्यन्ते । अग्निं इन्धयन्ति दीपयन्ति अग्नीध्राः इन्धी ञि ध ङ दीप्तौ ञिः नाम्नीति रः मनीषादित्वान्नलोपः । आदिना ब्रह्मोद्गातृहोत्रध्वर्य्युब्राह्मणाच्छंसिप्रभृतयः षोडश गृह्यन्ते । वार्य्या इति ऋहलोर्ण्यदिति ण्यत् इन्धुधेत्यादौ इ ञ इति आनुबन्धनिर्द्देशात् अन्यदधातोर्न ण्यप् ऋतौ यजन्ति ऋत्विजः क्विप् । यजन्ति याचकाः ण्वकः ।" इति भरतः ॥ * ॥ बहुयाजकग्रामयाजकयोर्निन्दा यथा,—

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः ।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
अनादिवाश्च यः पूर्व्वां सादित्याश्चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥"

इत्याह्निकतत्त्वे सन्ध्योपासनम् ॥

अपि च ।

"शूद्राणां पुरोहितः शूद्रयाजी ग्रामयाजीति कीर्त्तितः ।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः ॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ।
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

याजनं, क्ली, (याज्यते इति । यज् + णिच् + ल्युट् ।) यागक्रियाकारणा । याग कराण इति भाषा । तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः । यथा,—

"अध्यापनमध्ययनं यजनं याजनन्तथा ।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत् ॥"

इति मानवे १ अध्यायः ॥

याजिः, पुं, ( यज् + "वसिवपियजिराजीति ।" उणा० ४ । १२४ । इति इञ् । ) यज्ञः । इति संक्षिप्तसारोणादिवृत्तिः ॥ यागकर्त्ता । इत्युणादिकोषः ॥

याजुषं, त्रि, ( यजुष इदमिति । यजुष् + अण् । ) यजुर्व्वेदसम्बन्धि । इति सिद्धान्तकौमुदी ॥

याज्ञवल्क्यः, पुं, ( वल्कयतीति । वल्क + अच् । यज्ञस्य वल्को वक्ता । तस्य गोत्रापत्यम् । यज्ञवल्क + "गर्गादिभ्यो यञ् ।" ४ । २ । १०५ । इति यञ् । ) धर्म्मशास्त्रप्रयोजकमुनिविशेषः । तत्पर्य्यायः । ब्रह्मराशिः २ योगेशः ३ । इति हेमचन्द्रः ॥ योगीश्वरः ४ । इति मिताक्षरा ॥ ( महर्षिरयं याज्ञवल्क्यः सूर्य्यात् शुक्लयजुर्व्वेदं प्राप्तवान् । तथाहि ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तेषु कृपापरः चतुर्धा व्यस्य ऋग्यजुःसामाथर्व्वाख्यांश्चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश ते च स्वशिष्येभ्यः । तत्र व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्व्वेदमध्यापयत् । तत्र दैवात् केनापि हेतुना क्रुद्धो गुरुः शिष्यं याज्ञवल्क्यं अधीतवेदपरित्यागार्थमादिष्टवान् । याज्ञवल्क्योऽपि योगबलेन अधीतयजुर्विद्यां मूर्त्तिमतीं विधायोद्वाम । वान्तानि यजूंषि गृह्णीतेति गुरूक्त्या अन्ये शिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन् । तान्येव यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि । ततो वेदहीनोऽतिदुःखितो याज्ञवल्क्यः सूर्य्यमाराध्य शुक्लानि यजूंषि प्राप्तवान् तानि च जाबालगौधेयकाण्वमाध्यन्दिनादीन् पञ्चदशशिष्यानध्यापयामास । तथाहि भागवते द्वादशस्कन्धे ६ अध्याये ।

"तैमासौ चतुरो वेदांश्चतुर्भिर्व्वदनैर्विभुः ।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्रविवक्षया ॥
पुत्त्रानध्यापयत् तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् ।
ते तु धर्म्मोपदेष्टारः स्वपुत्त्रेभ्यः समादिशन् ॥
ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ।